६

प्रत्यक्षखण्डे प्रत्यक्षप्रमाणम्

प्रस्तावना

पूर्वस्मिन् पाठे विषयः सुबोधः भवतु इति धिया नैके विषयाः उपस्थापिताः। प्रमा इति प्रमुखविषयः। का तावत् प्रमा इत्यालोचितमेव।

अस्मिन् पाठे प्रमायाः भेदान् उल्लिख्य तासु प्रथमा प्रत्यक्षप्रमा का इति उपस्थापयिष्यते। वृत्तिः इति वेदान्तस्य अपरो विशेषः। वृत्तिरपि अस्मिन्नेव पाठे विवृतास्ति। सन्निकर्षः, इन्द्रियाणां करणत्वम् , ज्ञानादयः कस्य धर्माः, चैतन्यस्य भेदाः, ज्ञानगतस्य प्रत्यक्षत्वस्य प्रयोजकम्, विषयगतस्य प्रत्यक्षत्वस्य प्रयोजकम् इति विषया अस्मिन् पाठे अन्तर्भवन्ति। विषयः न्यायशैल्याम् लिखितः अस्ति। यद्यपि विषयः क्लिष्टः तथापि मुहुर्मुहुः पठनेन सुबोधः स्यात्। एवञ्च प्रथममेव सर्वोऽपि विषयः बुद्धौ आरूढः भवेत् इति न वक्तुं शक्यते। अतः यत्र विषयः नावगतः तत्र पठनस्य विरामम् अकृत्वा अग्रे पठनं नेयम्। कदाचित् स एव विषयः प्रकारान्तरेण अग्रे प्रतिपाद्यते। तदा तस्य ज्ञानं सुस्पष्टं भवितुम् अर्हति। बहुत्र एकस्य विषयस्य ज्ञानम् अपरविषयस्य ज्ञानेन स्पष्टं भवति। अत एव अग्रे पठनस्य पुनः पठनस्य चावश्यकता अस्ति।

उद्देश्यानि

इमम् पाठं पठित्वा भवान् -

- वेदान्तमते प्रमाभेदान् जानीयात्।
- षड्विधप्रमासु प्रत्यक्षप्रमा का इति ज्ञास्यति।
- वृत्तिः का बोद्धुं समर्थः भवेत्।
- इन्द्रियार्थसन्निकर्षं बुध्यात्।
- ज्ञानं सुखं दुःखं धर्मः अधर्मः इत्यादयः कस्य धर्मा इति बुद्ध्यात्।
- ज्ञानगतं यत् प्रत्यक्षत्वं तस्य प्रयोजकं बुध्यात्।
- विषयगतं यत् प्रत्यक्षत्वं तस्य प्रयोजकं बुध्यात्।

६.१) प्रमाभेदाः

प्रमा षोढा - प्रत्यक्षप्रमा अनुमितिः उपमितिः शाब्दी अर्थापत्तिः अनुपलब्धिः चेति। प्रमाणानि च षडित्यपि पूर्वमेव उक्तम्। प्रत्यक्षम् अनुमानम् उपमानम् आगमः अर्थापत्तिः अनुपलब्धिः चेति एतानि षट् प्रमाणानि। तेषु प्रत्यक्षप्रमायाः करणम् प्रत्यक्षप्रमाणम्।

का तावत् प्रत्यक्षप्रमा। लक्षणघटकीभूतानां पदानाम् अर्थस्य ज्ञानेन एव लक्ष्यस्य ज्ञानं सम्भवति। यावत् प्रत्यक्षप्रमा का इति ज्ञायते तावत् प्रत्यक्षप्रमाणं न ज्ञातुं शक्यते। किञ्च अनुमानादीनि प्रमाणानि प्रत्यक्षप्रमाणे आश्रितानि। अतः प्रत्यक्षप्रमाणस्य ज्येष्ठत्वम् इति तदेव आदौ उपन्यस्यते।

प्रत्यक्षप्रमा का इति प्रतिपादनात् पूर्वं तत्सम्बद्धाः केचित् विषयाः स्पष्टीक्रियन्ते।

प्रत्यक्षशब्दस्यार्थाः

प्रत्यक्षशब्दस्य प्रयोगः त्रिषु अर्थेषु क्रियते। प्रत्यक्षम् प्रमाणम्। प्रत्यक्षम् ज्ञानम्। प्रत्यक्षः विषयः। कदा कस्मिन्नर्थे प्रयोगः भवति इति तत्र तत्र सावधानं बोध्यम्।

विषयः

जीवो ब्रह्म एव नापरः इति जीवब्रह्मैक्यम् वेदान्तस्य प्रतिपाद्यः विषयः। एतदैक्यज्ञानमेव मोक्षः कथ्यते, ब्रह्मज्ञानम् इति च कथ्यते। ब्रह्मणः किं स्वरूपम् इत्यपि जिज्ञासा सुतराम् उदेति। सत्यं ज्ञानम् अनन्तं ब्रह्म (तै.उ.) इत्यादिश्रुतिप्रमाणेन सच्चिदानन्दस्वरूपं ब्रह्म। अर्थात् सत्स्वरूपम् चित्स्वरूपम् आनन्दस्वरूपं च ब्रह्म। इतोऽपि बहुभिः प्रकारैः ब्रह्म प्रतिपाद्यते परन्तु तद्विषये सूक्ष्मविचारः अस्य पाठस्य विषयः नास्ति। अतः अत्र विस्तराद् विरम्यते।

ब्रह्मस्वरूपम्

ब्रह्म एव चैतन्यम् उच्यते। अस्मिन् ब्रह्मणि सर्वं जगत् अध्यस्तम् अस्ति। यथा रज्जौ सर्पः अध्यस्तः भवति। यथा शुक्तौ रजतम् अध्यस्तम् भवति। यथा मरुमरीचिकायाम् मृगजलम् अध्यस्तम् भवति। तद्वत् चैतन्ये जगद् अध्यस्तम् अस्ति। अतः चैतन्यम् अधिष्ठानम् कथ्यते। यथा यदा रज्जौ सर्पत्वं प्रतीयते तदा स द्रष्टा तदानीं रज्जुं नैव पश्यति। रज्जुविषयकम् अज्ञानम् अस्ति। अधिष्ठानस्य रज्जोः यदा ज्ञानं भवति तदा सर्पत्वस्य विलोपः भवति। अतः अधिष्ठानज्ञानेन अध्यस्तस्य सर्वस्य विलोपः भवति। जगतः अधिष्ठानं यत् चैतन्यं, तस्य ज्ञानं भवति चेत् सर्वस्य जगतः विलोपः भवति। अर्थात् जगत् जगद्रुपेण न प्रतीयते। जगत् ब्रह्मरूपेण प्रतीयते। सर्व खल्विदं ब्रह्म इति श्रुतेः।

सृष्टिक्रमेण अन्तःकरणस्य सावयवत्वम्

चैतन्यविषयकम् अज्ञानमेव जगतः सृष्टिं प्रति कारणं भवति। तत्र अन्तःकरणं जगत् शरीराणि इन्द्रियाणि विषयाः इत्यादिकं सर्वमपि अज्ञानाद् एव जायते। तस्माद्वा एतस्माद् आत्मन आकाशः सम्भूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः इति श्रुतेः (तै.उ. ब्र.व.१.१)। अतः अन्तःकरणमपि आकाशादीनाम् पञ्चानां तन्मात्राणां सात्त्विकांशेभ्यः मिलितेभ्यः उत्पद्यते। अतः तत् तैजसम् इति कथ्यते। अर्थात् रविकिरणवद् अति स्वच्छं प्रकाशकं लघु चरञ्च भवतीति। अतः अन्तःकरणम् जन्यः पदार्थः अस्ति। अन्तःकरणं परमाणुपरिमाणं नास्ति। अतः सावयवस्य अन्तःकरणस्य आकारपरिणामः सम्भवति। अत एव अन्तःकरणं वृत्तिरूपेण परिणमते इति अग्रे प्रतिपाद्यते।

अत्र श्रुतिप्रमाणम् - १) तन्मनोऽसृजत इति। (तत् ब्रह्म मनः अर्थात् अन्तःकरणम् असृजद् इत्यर्थः। ब्रह्मकर्तृकम् अन्तःकरणकर्मकं सर्जनम् इति यावत्।) २) एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। (मु.उ. २.२) (प्राणो मनः सर्वाणि इन्द्रियाणि च ब्रह्मणः जायन्ते।) ३) अन्नमसितं त्रेधा विधीयते, तस्य यः स्थविष्ठो धातुस्तत् पुरीषं भवति, यो मध्यमस्तन्मांसं, योऽनिष्ठस्तन्मनः इति। (छा.उ. ६.५.१) (अन्नात् मनः भवतीति तात्पर्यम्।)

वृत्तिः

घटविषयकं चाक्षुषप्रत्यक्षं ज्ञानम् कथम् उत्पद्यते। यत्र सम्मुखे घटः स्थितः अस्ति तत्र अन्तःकरणम् चक्षुर्भ्याम् निर्गच्छति, घटाकारं च भवति।

तद्यथा तडागे स्थितं जलं छिद्रात् निर्गत्य कुल्यात्मना केदारान् प्रविश्य कुल्याकारं चतुष्कोणाद्याकारं भवति। अर्थात् जलं यावत् तडागे अस्ति तावत् तडागाकारं भवति। छिद्रेण तडागाद् बहिः निर्गच्छति। कुल्या अर्थात् प्रणाल्या केदारान् अर्थात् कृषिक्षेत्राणि गच्छति। यदा क्षेत्रं प्राप्नोति तदा यथा क्षेत्रं यदि त्रिकोणं स्यात् तर्हि जलमपि त्रिकोणाकारं भवति। यदि क्षेत्रं चतुष्कोणाकारं स्यात् तर्हि चतुष्कोणाकारं भवति। अर्थात् केदाराकारं भवति।

यथा वा - द्रोण्याम् गणेशमूर्तिः स्थापिता अस्ति। द्रोणी जलेन पूर्यते चेत् तद् जलं मूर्तिम् परितः व्याप्नोति, अन्तः मूर्तिः, बहिः जलम् इति स्थितिः भवति। तदा मूर्त्याकारं जलम् भवति इति न वक्तुं शक्यते, किन्तु मूर्तिं परितः जलमस्ति।

यथा वा द्रवीभूतः धातुः मूषानिषिक्तः मूषाकारः भवति।

अन्तःकरणमपि इन्द्रियद्वारा बहिः गत्वा घटादिविषयं परितः व्याप्नोति। तदा उच्यते यद् अन्तःकरणं घटादिविषयाकारं भवतीति। अन्तःकरणस्य अयं घटादिविषयाकारेण परिणामः हि वृत्तिः इति कथ्यते। अन्तःकरणं यदा यद्रूपेण वर्तते तदा तस्य तदाकारा वृत्तिः उच्यते। सा च वृत्तिः परिणामात्मिका। परिणामो हि विकारः। स च अवयवानाम् अन्यथात्वरूपः। परन्तु अन्तःकरणम् सावयवम् इति उक्तमेव। अतः सावयवस्य अन्तःकरणस्य परिणामः सुतराम् सम्भवति।

गुणक्रियाद्याकारा वृत्तिः कथम्

घटादयः हि द्रव्याणि सन्ति। तदाकारम् अन्तःकरणं भवितुम् अर्हति। किञ्च घटादिविषयकं प्रत्यक्षं ज्ञानम् उत्पद्यते। एवञ्च गुणस्य क्रियायाः द्रव्यत्वगुणत्वादीनाम् च अपि प्रत्यक्षम् उत्पद्यते। गुणादीनां न कोऽपि स्वकीयः आकारविशेषः अस्ति। अतः कथम् अन्तःकरणं गुणाकारं क्रियाकारं वा भवेत्।

समाधानम् - १ - गुणादीनां तदाश्रयद्रव्यतः न अत्यन्तम् भेदः। य आकारः आश्रयद्रव्यस्य स एव आकारः गुणक्रियादीनाम् अपि बोद्ध्यः। अतः गुणाद्याकारम् अन्तःकरणं भवितुमर्हति।

समाधानम् - २ -

घटम् अहं न जानामि अर्थात् घटविषयकाज्ञानवान् अहम् इत्याकारकज्ञाने अज्ञानस्य अनुभवः भवति। अतः घटादिविषयाः अज्ञानेन आवृताः भवन्ति। यदा घटादितः अज्ञानावरणं निवर्तते तदा घटादिविषयकं ज्ञानम् उत्पद्यते।

यावत् घटादिविषयः अज्ञानावृतः वर्तते तावत् 'घटः अस्ति', 'घटं पश्यामि' इत्यादिव्यवहारः अन्तःकरणे न भवति। अतः इदम् अज्ञानमेव 'घटः अस्ति' इत्येवम् अस्तित्वादिव्यवहारस्य प्रतिबन्धकम् अस्ति। अन्तःकरणस्य येन इन्द्रियेण सम्बन्धः अस्ति तस्य इन्द्रियस्य यदा विषयेण सम्बन्धः भवेत् तदा अन्तःकरणस्य काचित् विशिष्टा अवस्था भवति यस्याम् अज्ञानं निवर्तते किञ्च घटः अस्ति इत्यादिव्यवहारः सम्भवति। अन्तःकरणस्य इयम् अवस्था अस्तित्वादिव्यवहारस्य प्रतिबन्धकम् यद् अज्ञानम् तस्य निवृत्तियोग्या अवस्था। अयम् अवस्थाविशेष एव वृत्तिः इति कथ्यते। अतः गुणादीनाम् अतीतानागतानां वा यद्यपि आकारः न स्यात् तथापि तदाकारा वृत्तिः अर्थात् तद्विषयकस्य अज्ञानस्य निवृत्तियोग्या अन्तःकरणस्य अवस्था भवितुम् अर्हति। सा अवस्था हि वृत्तिः।

पाठगतप्रश्नाः -१

१. प्रमाभेदाः कति के च।

२. किं प्रमाणं ज्येष्ठम्।

३. प्रत्यक्षशब्दस्य प्रयोगः कतिषु केषु च अर्थेषु क्रियते।

४. अन्तःकरणम् सावयवं निरावयवं वा।

५. आकाशो नित्योऽनित्यो वा।

६. मनः कार्यमित्यत्र प्रमाणश्रुतिः का।

६.२) प्रत्यक्षप्रमा

घटम् अहं न जानामि अर्थात् घटविषयकाज्ञानवान् अहम् इत्याकारकज्ञाने अज्ञानस्य अनुभवः भवति। अतः घटादिविषयाः अज्ञानेन आवृताः भवन्ति। यदा घटादितः अज्ञानावरणं निवर्तते तदा घटादिविषयकं ज्ञानम् उत्पद्यते। अज्ञानं कदा निवर्तते। यदा प्रोक्तप्रकारेण वृत्तिः उत्पद्यते तदा घटादिविषयगतस्य अज्ञानस्य आवरणं निवर्तते। घटादिविषयः वस्तुतः घटादिविषयचैतन्यं कथ्यते। यदा आवरणं निवर्तते तदा इयं निवृत्तिः एव विषयचैतन्यस्य अभिव्यक्तिः कथ्यते। तद्यथा पटेन आवृतः घटः कदा अभिव्यक्तः भवति। यदा पटात्मकम् आवरणं निवर्तते तदा अभिव्यक्तः भवति। अर्थात् अज्ञानावरणस्य निवृत्तिरेव विषयस्य अभिव्यक्तिः। इत्थम् अभिव्यक्तम् विषयचैतन्यम् एव विषय-प्रमा कथ्यते। चैतन्यमेव प्रत्यक्षप्रमा। शुद्धम् अर्थात् उपाधिरहितम् चैतन्यम् न प्रमा।

सन्निकर्षः

इन्द्रियस्य विषयेण सम्बन्धः भवति चेत् वृत्तिः उत्पद्यते। तया वृत्त्या विषयचैतन्यम् अभिव्यक्तं भवति। इन्द्रियविषययोः तादृशः सम्बन्धः एव सन्निकर्षः कथ्यते।

इन्द्रियस्य करणत्वम्

तज्जन्यत्वे सति तज्जन्यजनकत्वं व्यापारलक्षणम्। इन्द्रियं सन्निकर्षात्मकव्यापारद्वारा प्रत्यक्षप्रमां प्रति कारणम् भवति। प्रत्यक्षप्रमा इन्द्रियजन्या। यावत् सन्निकर्षः न भवति तावत् प्रमा न जायते। अतः प्रमाजनकः सन्निकर्षः। इन्द्रियस्य सम्बन्धः एव सन्निकर्षः। अतः सन्निकर्षः इन्द्रियजन्यः। एवं सन्निकर्षे इन्द्रियजन्यत्वम् अस्ति, इन्द्रियजन्यप्रमायाः जनकत्वम् अस्ति। अतः इन्द्रियजन्यत्वे सति इन्द्रियजन्यजनकत्वात् सन्निकर्षः व्यापारः भवति। व्यापारः इन्द्रियस्य अस्ति इति इन्द्रियं व्यापारवद्। अपि च इन्द्रियं प्रमां प्रति कारणमपि अस्ति। अतः इन्द्रियं व्यापारवद् असाधारणं कारणम्। अतः इन्द्रियं प्रमां प्रति करणमिति सिद्धम्। प्रमायाः करणं प्रमाणम्। अतः इन्द्रियं प्रत्यक्षप्रमां प्रति प्रमाणम्।

अनादि चैतन्यं कथं प्रमा

चैतन्यम् तु अनादि अर्थात् अजन्यम् , उत्पत्तिरहितम्, यस्य आदिः नास्ति तद्। प्रमा च उत्पद्यते। चैतन्यमेव प्रमा इत्युक्तम्। प्रमायाः करणम् प्रमाणम्। करणम् तु कारणविशेषः। अतः यस्य कारणम् अस्ति सा प्रमा सादिः अर्थात् जन्या, उत्पद्यते। प्रमा च चैतन्यम्। अतः कथम् सादिः प्रमा एव अनादि चैतन्यम् इति। किञ्च यदि अनादि चैतन्यं तर्हि तस्य किमपि करणं नैव सम्भवतीति उदेति प्रश्नः। तत्रोच्यते यद् यद्यपि विशेष्यम् अनादि तथापि तस्य विशेषणं यदि सादि तर्हि तेन विशेषणेन विशिष्टं तद् विशेष्यमपि सादि कथ्यते। प्रकृते च इन्द्रियार्थसन्निकर्षेण अन्तःकरणवृत्तिः उत्पद्यते। तस्यां वृत्तौ विषयचैतन्यम् अभिव्यक्तम् भवति। वृत्तिः सादिः। अतः वृत्त्यभिव्यक्तचैतन्यम् अपि सादि, आदिमत्, जन्यं कथ्यते। तद्यथा घटो नीलः क्रियते इत्यादौ नीलावच्छिन्नघटः विशेष्यीभूतः। स प्रागुत्पन्न एव। यदा स नीलः क्रियते तदा सः अजन्यः एव। तथापि विशेषणीभूतस्य नीलगुणस्य तदानीम् उत्पत्तिः भवति। अतः नीलावच्छिन्नः घटः अपि उत्पद्यते इति उच्यते। तद्वत् वृत्तिविशिष्टचैतन्यम् अजन्यम्। तथापि तदवच्छेदकवृत्तिः इन्द्रियार्थसन्निकर्षेण जन्यते। अतः तदवच्छिन्नं चैतन्यमपि जन्यम् उच्यते।

वृत्तौ ज्ञानत्वोपचारः

सिद्धान्ते वृत्तिरेव ज्ञानम्। परन्तु ज्ञानं चैतन्यम्। वृत्तिश्च अन्तःकरणपरिणामः जडा। कथं वृत्तिरेव प्रमा। कथं चैतन्यं जडम्। किञ्च सिद्धान्ते इन्द्रियम् एव प्रमाणम्। करणस्य व्यापारात् अव्यवहितोत्तरम् वृत्तिः उत्पद्यते। सा वृत्तिः इन्द्रियाद् बहिः गच्छति, विषयेण च संसृष्टा सती विषयचैतन्यम् अभिव्यनक्ति। इदं करणं प्रमाकरणम्। प्रमा च अभिव्यक्तं चैतन्यम्। अतः इदं करणं तु वृत्तिं प्रति करणं, न तु प्रमां प्रति। यतो हि करणव्यापाराद् अव्यवहितोत्तरं यदुत्पद्यते तत् प्रति एव तस्य करणत्वम्।

अभिव्यक्तस्य प्रमाचैतन्यस्य वृत्तिः उपाधिः। इयम् वृत्तिः प्रमाचैतन्यम् अन्यचैतन्यात् व्यावर्तयति। अतः वृत्तिः प्रमाचैतन्यस्य अवच्छेदिका भवति। अतः वृत्तिः हि चैतन्यरूपज्ञानस्य अवच्छेदिका। इयं वृत्तिः चैतन्ये अभेदेन अध्यस्ता सती प्रमात्वं प्राप्नोति। अतः वृत्तौ प्रमात्वस्य सत्त्वात् वृत्तिः प्रमा अर्थात् ज्ञानम् इति व्यवहारः भवति। वृत्तिश्च चक्षुरादीन्द्रियस्य व्यापाराद् अव्यवहितोत्तरम् उत्पद्यते। अतः इन्द्रियम् वृत्तिं प्रति करणं भवति। वृत्तौ ज्ञानत्वस्य उपचारः भवति। अतः प्रमां प्रति इन्द्रियं करणं भवतीति इन्द्रियं प्रमाणम् इति सिध्यति। वृत्तौ ज्ञानत्वस्य व्यवहारः गौणत्वेन, अध्यासवशात् भवति।

न्यायमते ज्ञानम् गुणः। तद् समवायेन आत्मनि वर्तते। परन्तु वेदान्तनये प्रमात्मकं ज्ञानम् तु चैतन्यम्। अपि च उपचारात् वृत्तिरेव प्रमा उच्यते। वृत्तिस्तु मनोधर्मः, अन्तःकरणधर्मः, न तु आत्मधर्मः। तथाहि श्रुतिः - कामः सङ्कल्पो विचिकित्सा श्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एव इति। (अर्थः - कामः (इच्छा), सङ्कल्पः (शुक्लनीलादिभेदे विषयविकल्पः, अनेन कर्मणा इष्टं फलं साध्यते इत्येव विषया बुद्धिः), विचिकित्सा (संशयः), श्रद्धा (आस्तिक्यबुद्धिः, वेदादिशास्त्रेषु दृढविश्वासः), अश्रद्धा (अनास्तिक्यबुद्धिः, शास्त्रेषु अविश्वासः), धृतिः (धारणम्, इष्टवियोगे अनिष्टप्राप्तौ च अवैक्लव्यम् , देहादीनाम् अवसादहेतौ सति तेषाम् उत्तम्भनम्), अधृतिः (तत्र वैक्लव्यम्), ह्रीः (अकार्यप्रवृत्तिवशाद् अप्रतिभत्वम्, लोकलज्जा), धीः (बुद्धिः, वृत्तिः), भीः (भयम्) एतत् सर्वम् मन एव (अन्तःकरणमेव) परिणतिरूपा वृत्तिरेव।) अतः इदं श्रुत्या प्रमाणितं यद् ज्ञानम् इच्छा इत्यादयः मनोधर्माः।

ज्ञानादयः कस्य धर्माः

अहं जानामि, अहम् इच्छामि इत्यादिप्रतीतिः समेषां मनुजानां भवति। तत्र अहं ज्ञानवान्, अहम् इच्छावान् इत्यादिः प्रत्यक्षानुभवः। एतेन अनुभवेन सिद्ध्यति यत् ज्ञानदिकम् आत्मधर्मः, न तु मनोधर्मः इति नैयायिकानाम् आक्षेपः।

समाधानम् - वस्तुतः वह्निः विविक्तः दहति। परन्तु तप्ते लौहपिण्डे स्पर्शेन दाहप्रतीतिः जायते तदा दग्धः वदति यत् लौहपिण्डः दहतीति। तत्रोच्यते - वह्निलौहपिण्डयोः तादात्म्याध्यासः अत्र कारणं भवति। वह्नेः दग्धृत्वधर्मः लौहपिण्डे आरोप्यते। एवमेव आत्मना अन्तःकरणस्य ऐक्याध्यासः भवति। तदा आत्मनि ज्ञानसुखादीनाम् अन्तःकरणधर्माणाम् आरोपः, अध्यासः भवति। अध्यासवशादेव अनुभवः 'अहं सुखी' इत्यादिः उपपद्यते।

अहं सुखी इत्याद्यनुभवे यथा सुखं विषयः भवति तथा अहंपदवाच्यम् अन्तःकरणमपि विषयः भवति। सुखं यथा प्रत्यक्षं तथा अन्तःकरणमपि प्रत्यक्षम् इति अङ्गीकर्तव्यम्। इन्द्रियविषयकं प्रत्यक्षज्ञानं न भवति। किन्तु अन्तःकरणं न इन्द्रियम्। अपि च तद् सावयवम् अस्ति। अतः अन्तःकरणस्य प्रत्यक्षम् भवति। अन्तःकरणस्य अनिन्द्रियत्वे श्रुतिः - इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः इति।

६.३) प्रत्यक्षत्वस्य प्रयोजकम्

इन्द्रियजन्यत्वं प्रत्यक्षत्वस्य प्रयोजकं चेत् अव्याप्तिदोषः - १

श्रोत्रं त्वक् चक्षुः जिह्वा (रसना) घ्राणम् एतानि पञ्च ज्ञानेन्द्रियाणि। यदि इन्द्रियस्य अर्थेन सह सन्निकर्षाद् उत्पन्नं ज्ञानं प्रत्यक्षम् इति मन्यते तदा एतैः पञ्चभिः इन्द्रियैः यद् ज्ञानं भवति तदेव प्रत्यक्षम् भवेत्। मनः तु न इन्द्रियम्। मनसा सुखादिकं ज्ञायते। तद् सुखादिविषयकं ज्ञानं प्रत्यक्षं न भवेत्। परन्तु वेदान्तमते सुखादीनाम् अपि प्रत्यक्षज्ञानं भवति। सुखादीनां प्रत्यक्षं न इन्द्रियजन्यम्। अतः अव्याप्तिः। प्रत्यक्षत्वस्य प्रयोजकं किम् इति प्रश्नः।

इन्द्रियजन्यत्वं प्रत्यक्षत्वस्य प्रयोजकं चेत् अव्याप्तिदोषः - २

किञ्च ईश्वरस्य ज्ञानमपि प्रत्यक्षम्, अर्थात् ईश्वरः यद् जानाति तत् सर्वं प्रत्यक्षमेव। परन्तु ईश्वरः सर्वज्ञः। तस्य ज्ञानं नित्यम्। तस्य ज्ञानं न उत्पद्यते। अतः इन्द्रियजन्यं नास्ति। यदि इन्द्रियजन्यत्वम् एव प्रत्यक्षत्वस्य प्रयोजकं तर्हि ईश्वरप्रत्यक्षे अव्याप्तिः भवति।

इन्द्रियजन्यत्वं प्रत्यक्षत्वस्य प्रयोजकं चेत् अतिव्याप्तिदोषः -

यद् इन्द्रियजन्यं तत् प्रत्यक्षम् इति इन्द्रियजन्यत्वं प्रत्यक्षत्वप्रयोजकं तर्हि अनुमितिः अपि इन्द्रियजन्या अस्ति। मनः सर्वज्ञानं प्रति कारणं भवति एव। यदि मनः इन्द्रियं तर्हि अनुमितिं प्रति अपि कारणं मनः। तर्हि अनुमितौ प्रत्यक्षत्वापत्तिः।

अतः प्रत्यक्षत्वस्य प्रयोजकं किमिति प्रश्नः।

प्रत्यक्षशब्दस्य त्रिषु अर्थेषु प्रयोगः

प्रत्यक्षत्वं यस्मिन् तत् प्रत्यक्षम् इति। प्रत्यक्षशब्दस्य प्रयोगः त्रिषु अर्थेषु। यथा प्रत्यक्षा प्रमा, प्रत्यक्षः विषयः, प्रत्यक्षम् प्रमाणम् इति। प्रत्यक्षप्रमायाः करणत्वं हि प्रमाणगतस्य प्रत्यक्षत्वस्य प्रयोजकम्। तत् तु सुविदितमेव। अतः अत्र प्रमागतस्य प्रत्यक्षत्वस्य किञ्च विषयगतस्य प्रत्यक्षत्वस्य प्रयोजकं किमिति प्रस्तूयते।

{**प्रयोजकम्** -

प्रयोजकशब्दस्य व्यवहारः बाहुल्येन भवति। अतः प्रयोजकं नाम किमिति बोद्धव्यम्।

अव्यवधानेन, साक्षात् कार्यजनकं कारणं भवति। परम्परया कार्यजनकं प्रयोजकम् भवति। कारणस्य कारणं प्रयोजकम्। यथा वेगेन प्रवहता वातेन वृक्षकम्पः जातः। वृक्षकम्पेन फलं विलग्नं भूमौ पतितम्। पतनात् भग्नम्। अत्र फलभङ्गं प्रति फलभूमिसंयोगः साक्षात् कारणम्। वातप्रवाहः, वृक्षकम्पः वा न साक्षात् भङ्गजनकः, अपि तु परम्परया। अतः वातप्रवाहः, वृक्षकम्पः वा अत्र परम्परया भङ्गजनकः इति फलभङ्गप्रयोजकः।}

इन्द्रियार्थसन्निकर्षजन्यज्ञाने एव प्रत्यक्षत्वं वर्तते, अन्यस्मिन् ज्ञाने नास्ति इति चेत् तत्र अन्यस्मिन् ज्ञाने कुतः प्रत्यक्षत्वं नास्ति इति जिज्ञासा उदेति। अर्थात् ज्ञानगतस्य प्रत्यक्षत्वस्य प्रयोजकं किमिति।

प्रत्यक्षत्वस्य प्रयोजकम् इत्यस्य - 'इदं ज्ञानं प्रत्यक्षम्' इति व्यवहारस्य प्रयोजकम् इत्यर्थः। 'अयं विषयः प्रत्यक्षः' इति व्यवहारस्य प्रयोजकम् इत्यर्थः। 'इदं प्रमाणं प्रत्यक्षम्' इति व्यवहारस्य प्रयोजकम् इत्यर्थः।

तद्यथा चैत्रः प्रवासी इति व्यवहारः। अयं वाचिकव्यवहारः कदा सम्भवति। अर्थात् चैत्रगतस्य प्रवासित्वस्य प्रयोजकं किम्। चैत्रः यदा प्रवासं करोति तदा स प्रवासी भवति। अतः चैत्रगतं प्रवासित्वम्। तत् तदा एव सम्भवति यदा चैत्रः प्रवासं करोति। अर्थात् चैत्रस्य प्रवासकरणं चैत्रगतस्य प्रवासित्वस्य प्रयोजकम् भवति।

तद्वत् प्रकृतप्रकरणे इदं ज्ञानं प्रत्यक्षम्, अथवा अस्मिन् ज्ञाने प्रत्यक्षत्वम् अस्ति इति कदा वक्तुं शक्यते इति अत्र आलोच्यविषयः। अर्थात् **ज्ञानगतं प्रत्यक्षत्वं** विमृश्यते।

विषयगतं प्रत्यक्षत्वम्

प्रत्यक्षज्ञानविषयत्वं प्रत्यक्षत्वस्य प्रयोजकम् इति लक्षणे अतिव्याप्तिदोषः-

प्रत्यक्षज्ञानविषयत्वं प्रत्यक्षत्वस्य प्रयोजकम् अर्थात् प्रत्यक्षज्ञानस्य विषयः प्रत्यक्षः इति उच्यमाने तत्र दोषः अस्ति। प्रत्यभिज्ञा अपि प्रत्यक्षं ज्ञानम्। तत्तेदन्तावगाहि ज्ञानं हि प्रत्यभिज्ञा। सोऽयं देवदत्तः इत्याकारकप्रत्यभिज्ञायाम् तत्ता हि स्मृतिविषयः, इदन्ता हि अनुभवः। तत्तांशस्य प्रत्यक्षं नास्ति तथापि तत्तांशः प्रत्यक्षज्ञानस्य विषयः।

प्रत्यक्षज्ञानविषयत्वं प्रत्यक्षत्वस्य प्रयोजकम् इति लक्षणे अव्याप्तिदोषः-

साक्षी प्रत्यक्ष एव अस्ति। परन्तु स कदापि प्रत्यक्षज्ञानस्य विषयः न भवति। अतः अव्याप्तिदोषः उद्भवति। प्रत्यक्षविषयत्वं न विषयगतस्य प्रत्यक्षत्वस्य प्रयोजकम्।

प्रसङ्गात् साक्षी कः इति उच्यते।

साक्षी

अन्तःकरणोपहितं चैतन्यं साक्षी इति कथ्यते। साक्षी सदा प्रकाशस्वभावः। साक्षी कदापि घटादिवत् ज्ञानस्य विषयो भूत्वा न प्रकाशते। साक्षी स्वयंप्रकाशः। कदापि अज्ञानावृतः न भवति।

साक्षी चेता केवलो निर्गुणश्च इति श्रुतिः। (श्वे.उ.६.११)। उदासीनत्वे सति बोद्धृत्वं साक्षिणः लक्षणम्। यदि उदासीनत्वमात्रम् एव साक्षिलक्षणं तर्हि इन्द्रियादौ अतिव्याप्तिः, तेषामपि जडतया उदासीनत्वात्। अतः बोद्धृत्वं निवेश्यते। तेन नातिव्याप्तिः। इन्द्रियादीनाम् जडत्वात् बोद्धृत्वाभावात्। यदि उदासीनत्वपदानुपादाने बोद्धृत्वमात्रं साक्षिलक्षणं भवति। तदा जीवे अतिव्याप्तिः। जीवस्यापि बोद्धृत्वात्। अतः उदासीनत्वं विशेषणम् उपादीयते। तेन नातिव्याप्तिः। जीवस्य उदासीनत्वाभावात्। जीवः कर्ता भोक्ता इत्यादिरूपेण सक्रियः अस्ति न तु उदासीनः।

त्रिविधं चैतन्यम्

ज्ञानगतस्य विषयगतस्य च प्रत्यक्षत्वस्य प्रयोजकं किम् इति प्रतिपादने उपाधिवशात् चैतन्यस्य भेदाः कल्प्यन्ते। तद्विषयकं सुस्पष्टं ज्ञानम् आवश्यकमिति अधः तदेव प्रस्तूयते।

वृत्तिः का इति पूर्वं निरूपिता। अन्तःकरणस्य विषयाकारः परिणामविशेषः अथवा अवस्थाविशेषः वृत्तिः। अनया वृत्त्या अवच्छिन्नं चैतन्यम् हि प्रमाणचैतन्यम्। तदेव वृत्त्यवच्छिन्नचैतन्यं, **प्रमाणचैतन्यम्** , प्रमाणम् इति एतैः शब्दैः व्यपदिश्यते।

यः घटादिः ज्ञानस्य विषयः भवति, तदवच्छिन्नं चैतन्यं विषयावच्छिन्नचैतन्यं, विषयचैतन्यं, विषयः इति शब्दैः व्यपदिश्यते। तदेव **प्रमेयचैतन्यम्** इत्यप्युच्यते।

अन्तःकरणस्य यावान् अंशः विषयाकारः परिणामः नास्ति, तेन अन्तःकरणांशेन अवच्छिन्नं चैतन्यम् अन्तःकरणावच्छिन्नचैतन्यं, **प्रमातृचैतन्यं**, प्रमाता इति शब्दैः व्यपदिश्यते।

चैतन्यं तु एकमेव। कथं तर्हि तस्य त्रैविध्यम्।

उपाधिभेदात् चैतन्यस्य भेदः कल्प्यते। यथा घटावच्छिन्नः आकाशः घटाकाशः कथ्यते। मठावच्छिन्नः आकाशः मठाकाशः कथ्यते। यदा घटः मठात् बहिः वर्तते तदा द्वौ अवच्छिन्नौ आकाशौ प्रतीयेते। अत्र आकाशे कोऽपि भेदः नास्ति। तत्र केवलं कल्पितः भेदः अस्ति। आकाशस्य उपाधिः घटादिः नष्टः चेत् एक एव आकाशः अवशिष्यते।

एवम् अन्तःकरणं वृत्तिः विषयः इत्यादिभिः उपाधिभिः चैतन्यस्य सम्बन्धवशात् इदम् अन्तःकरणावच्छिन्नचैतन्यम्, इदं वृत्त्यवच्छिन्नचैतन्यम्, इदं विषयावच्छिन्नचैतन्यम् इति व्यवहारः उपपद्यते। चैतन्यस्य एवं भेदः कल्पितः एव न तु वास्तविकः। चैतन्ये स्वगत-सजातीय-विजातीय-भेदाः न सन्तीति हि सिद्धान्तः।

चैतन्येन सह सम्बन्धवशात् चैतन्ये स्वस्य धर्मस्य आरोपं कृत्वा चैतन्ये भेदम् उत्पादयति स हि उपाधिः।

शुक्तिविषयकम् अज्ञानं दूरदेशे स्थितायाः शुक्तेः विशेषांशं शुक्तित्वम् आवृणोति। ततः दोषेण अज्ञानं रजतत्वेन विपरिणमते। अज्ञानं च शुक्तेः सामान्यांशे अभेदेन आश्रितं भवति। तदा शुक्तिः शुक्तित्वेन न प्रकाशते। किन्तु रजतत्वेन प्रकाशते।

एवमेव विश्वव्यापकम् अज्ञानं चैतन्यम् आवृणोति। ततः दोषेण अज्ञानं घटादिरूपेण परिणमते। अज्ञानं चैतन्ये अभेदेन आश्रितं भवति। तदा चैतन्यं चैतन्यत्वेन न प्रकाशते। किन्तु घटादिरूपेण प्रकाशते।

यदा अज्ञानस्य परिणामः घटपटादिविषयः चैतन्ये अभेदेन आश्रितो भवति तदा विषयः चैतन्यस्य उपाधिः, अवच्छेदको वा भवति। किञ्च तदा स विषयः घटावच्छिन्नचैतन्यं, पटावच्छिन्नचैतन्यम् इत्यादिरूपेण अभिन्नेऽपि चैतन्ये काल्पनिकं भेदं जनयति।

इति त्रिविधं चैतन्यम् इति प्रतिपादितम्।

पाठगतप्रश्नाः -२

७. प्रत्यक्षप्रमा का।

८. सन्निकर्षः कः।

९. व्यापारलक्षणं किम्।

१०. इन्द्रियस्य करणत्वे को व्यापारः।

११. करणलक्षणं किम्।

१२. वृत्त्यात्मकं ज्ञानं कस्य धर्मः।

१३. कामः धृतिः इच्छा इत्यादयः कस्य धर्माः।

१४. ज्ञानेद्रियाणि कति कानि च।

१५. मन इन्द्रियं न वा।

१६. मनसः अनिन्द्रियत्वे प्रमाणं श्रुतिम् लिखत।

१७. ईश्वरः अनुमिनोति न वा।

१८. का प्रत्यभिज्ञा।

१९. साक्षी कः।

२०. प्रमाणचैतन्यम् किम्।

२१. प्रमातृचैतन्यं किम्।

६.३.१) ज्ञानगतस्य प्रत्यक्षत्वस्य प्रयोजकम्

ज्ञानगतस्य प्रत्यक्षत्वस्य प्रयोजकं किमिति आलोच्यते इतः परम्।

प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभेदः हि ज्ञानगतस्य प्रत्यक्षत्वस्य प्रयोजकम्। विषयावच्छिन्नचैतन्याभिन्नप्रमाणचैतन्यत्वम् इत्यर्थः। अर्थात् यदा विषयावच्छिन्नचैतन्यस्य प्रमाणचैतन्येन अभेदः भवति तदा तत्र यद् ज्ञानम् उत्पद्यते तत् प्रत्यक्षं ज्ञानम् इति।

तद्यथा - घटः मठाद् बहिः अस्ति तदा घटावच्छिन्नः आकाशः मठावच्छिन्नाद् आकाशाद् भिन्नः भवति। यदा तु घटः मठे स्थाप्यते तदा घटाकाशः मठाकाशाद् भिन्नः नास्ति। यः घटाकाशः स मठाकाशः भवति एव। यद्यपि यः मठाकाशः स घटाकाशः इति नास्ति। तथापि सर्वः घटाकाशः मठाकाशः अस्ति एव। घटः मठः च आकाशस्य द्वौ उपाधी। तदा आकाशः च उपहितः कथ्यते, अथवा उपधेयः इत्यपि कथ्यते। उपाधिद्वयम् एकदेशे अस्ति चेत् उपहितस्य (उपधेयस्य) आकाशस्य अभेदः भवति।

एवमेव यदा विषयचैतन्यं प्रमाणचैतन्यं च एकदेशे भवति तदा उपहितं चैतन्यद्वयं भिन्नं न तिष्ठति, तयोः चैतन्ययोः अभेदः भवति।

यदा विषयः बाह्यः तदा तेन विषयेण (अर्थेन) सह इन्द्रियस्य सन्निकर्षः भवति चेद् वृत्तिः विषयदेशं गच्छति। यदा वृत्तिः विषयदेशं गच्छति तदा उपाधिद्वयम् एकदेशस्थं भवति।

अयं घटः इति प्रत्यक्षज्ञानस्थले विषयः घटः, स च बाह्यः, अन्यदेशस्थः च। इन्द्रियस्य अर्थेन सह सन्निकर्षवशात् अन्तःकरणम् इन्द्रियद्वारेण बहिः गच्छति, घटदेशस्थं भवति। एवञ्च तस्य घटाकारेण परिणामः भवति। तदा घटाकारा वृत्तिः भवति, तद्देशस्था च इयम्। इयं वृत्तिरेव प्रमाणम्। तदवच्छिन्नं चैतन्यम् प्रमाणचैतन्यम्। यदा घटाकारा वृत्तिः भवति तदा घटावच्छिन्नचैतन्यस्य प्रमाणचैतन्येन अभेदः भवति। तदा 'अयं घटः' घटविषयकं प्रत्यक्षम् ज्ञानम् उत्पद्यते।

घटः मठे अस्ति अर्थात् द्वयोः एकदेशस्थत्वम् अस्ति चेत् घटाकाश-मठाकाशयोः ऐक्यं भवति। अयं घट इति ज्ञानस्थले घटः चैतन्यस्य उपाधिः, वृत्तिः चैतन्यस्य उपाधिः। यदा वृत्तिः घटाकारा भवति, अर्थात् घटः वृत्तौ अस्ति, अर्थात् घटस्य वृत्तेश्च **एकदेशस्थत्वम्** अस्ति तदा उपधेयस्य चैतन्यद्वयस्य अभेदः भवति। घटः भूतले अस्ति, वृत्तिः भूतले नास्ति, वृत्तिः घटाकारा, घटम् आश्रित्य अस्ति। अतः उपाधिद्वयं यद्यपि एकदेशे नास्ति। तथापि वृत्तिः विषयाकारा भवति तदा विषयः वृत्तिः च इति उपाधिद्वयमपि एकदेशस्थम् इति व्यवहारः क्रियते।

अनुमितिस्थले प्रत्यक्षत्वम्

पर्वतो वह्निमान् धूमात् इत्यादिकम् अनुमानस्थलम्। तत्र पर्वतो वह्निमान् इति अनुमितिः जायते। अनुमितिः परोक्षं ज्ञानम्, न तु प्रत्यक्षं ज्ञानम्। अत्र पर्वतः वह्निः, तयोः सम्बन्धः एतत्सर्वं भासते। यतो हि पर्वतस्य इन्द्रियेण सन्निकर्षः भवति, वह्नेः न भवति। वृत्तेः बहिः गमनस्य हेतुः हि इन्द्रियस्य अर्थेन सह सन्निकर्षः। स च सन्निकर्षः पर्वतेन सह अस्ति, वह्निना सह नास्ति। अतः पर्वताकारा वृत्तिः भवति, वह्न्याकारा न भवति। विषयः हि पर्वतः, स उपाधिः। वृत्तिरपि उपाधिः। उपाधिद्वयम् एकदेशे अस्ति। अतः उपधेययोः चैतन्ययोः अभेदः भवति। परन्तु वह्निस्थले तथा एकदेशस्थत्वं नास्ति। अतः पर्वतो वह्निमान् इति स्थले पर्वतविषयं प्रत्यक्षं ज्ञानम् उत्पद्यते, वह्निविषये तु परोक्षं ज्ञानम् उत्पद्यते।

ज्ञानानाम् प्रत्यक्षम् , तेषां विषयाणां प्रत्यक्षत्वं परोक्षत्वं वा।

प्रत्यक्षम्, अनुमितिः उपमितिः शाब्दम् अर्थापत्तिः अनुपलब्धिः इति एतानि षड्विधज्ञानानि वेदान्तमते। तेषाम् करणमपि षड्विधम्। तथाहि - प्रत्यक्षम् , अनुमानम् , उपमानम् , आगमः (शब्दः), अर्थापत्तिः, अनुपलब्धिः इति।

सर्वाणि ज्ञानानि प्रत्यक्षेण ज्ञायन्ते। अर्थात् एतज्ज्ञानविषयकाणि ज्ञानानि प्रत्यक्षाणि, साक्षात् साक्षिवेद्यानि सन्ति। परन्तु तेषु प्रत्यक्षज्ञानस्य विषयः घटादिः अपि प्रत्यक्षः अस्ति, अनुमितौ भासमानः वह्न्यादिविषयः न प्रत्यक्षः। स तु अनुमेयः, परोक्षः। एवम् अन्येषु ज्ञानेषु। अतः एव यदा घटादिविषयकं

ज्ञानं जायते तज्ज्ञानं घटांशे प्रत्यक्षम् इति कथ्यते। ज्ञानविषयकं ज्ञानं सदा प्रत्यक्षं किन्तु प्रत्यक्षज्ञानस्य विषयः एव प्रत्यक्षः, अन्येषां विषयः तु परोक्षः इति भावः।

प्रमेयाणि

यावद् ज्ञानं जायते तत्र के विषयाः, कानि प्रमेयाणि इति चेत् विषयस्य सौकर्याय इत्थं वक्तुं शक्यते यत् -

- बाह्यविषयाः, अर्थात् पञ्चभिः ज्ञानेन्द्रियैः ज्ञेयाः विषयाः - द्रव्याणि तेषां गुणाः, मूर्तद्रव्यगताः क्रियाः, जातिः, उपाधिरूपाः धर्माः।
- अन्तःकरणे विद्यामानाः धर्माः। यथा सुखं दुःखम् धर्मः अधर्मः ज्ञानम् इत्यादिकम्।
- अन्तःकरणमपि स्वयं विषयः। अन्तःकरणे वृत्तिः जायते। वृत्तिरपि विषयः।
- प्रातिभासिकरजतादिकम्। अभावः।
- साक्षी। आत्मा।

एते विषयाः ज्ञातव्याः सन्ति। एषु कः प्रत्यक्षः, कः परोक्षः इत्यादिविवेचनं प्रचलति।

सुखादिविषयकं प्रत्यक्षम्

सुखादिकम् प्रातिभासिकरजतादिकम् च यदा विषयः तदा कथं प्रत्यक्षम् उत्पद्यते।

सुखादिकं तु अन्तःकरणस्य धर्मः एव, आन्तरः विषयः, न तु बाह्यः। अतः इन्द्रियद्वारा वृत्तेः बहिर्गमनं नावश्यकम्। अत एव विषयः तदाकारा वृत्तिः च सदा एकदेशे भवति। तेन तदवच्छिन्नचैतन्ययोः अभेदः। अतः सुखादिविषयकं प्रत्यक्षम् ज्ञानम् उत्पद्यते। सुखावच्छिन्नचैतन्यं सुखाकारवृत्त्यवच्छिन्नचैतन्यं सदा एकदेशे अवस्थितम्। अतः सुखादिकस्य सदा प्रत्यक्षमेव ज्ञानम् उत्पद्यते। कदापि परोक्षं नोत्पद्यते।

स्वगतसुखस्मृतौ अतिव्याप्तिः

यदा स्वस्य अतीतसुखस्य स्मृतिः भवति तत्र सुखं विषयः। स च अतीतः परन्तु अन्तःकरणमेव तस्य देशः। सुखाकारा स्मृतिरूपा वृत्तिः उदेति। वृत्तिदेशः अपि अन्तःकरणमेव। अतः सुखात्मकः उपाधिः वृत्त्यात्मकः उपाधिश्च एकदेशे अस्ति। अतः सुखावच्छिन्नचैतन्यस्य तदाकारवृत्त्यवच्छिन्नचैतन्येन अभेदः सदा अस्ति। तेन अतीतसुखस्य स्मृतिः अपि प्रत्यक्षं ज्ञानम् इति आपत्तिः। सुखस्मृतिः तु न प्रत्यक्षज्ञानमिति सिद्धान्तः। अतः अतिव्याप्तिवारणाय विषयस्य वर्तमानत्वं विशेषणं देयम्। अर्थः यदा विषयाकारा वृत्तिः उदेति तदा स विषयः वर्तमानः यदि स्यात् तर्हि तद्विषयकं ज्ञानं प्रत्यक्षम् इति अङ्गीकर्तव्यम्।

सुखस्मृतिस्थले यद्यपि सुखात्मकः उपाधिः किञ्च स्मृत्यात्मकः उपाधिः एकदेशे अस्ति, तथापि विषयः सुखम् अतीतम् अस्ति, वर्तमानं नास्ति। अतः अतीतसुखविषयकस्मृतौ न प्रत्यक्षत्वापत्तिः।

एतावता इदम् आयातं यद् यदि विषयः वर्तमानः अस्ति, किञ्च उपाधिद्वयम् एकदेशे अस्ति, तर्हि उपधेयचैतन्ययोः अभेदः भवति चेत् ज्ञानं प्रत्यक्षम् इति। अर्थात् **प्रमाणचैतन्यस्य वर्तमानविषयचैतन्येन अभेदः** प्रत्यक्षत्वस्य प्रयोजकम्।

स्वगतधर्माधर्मज्ञाने अतिव्याप्तिः

वेदविहितकर्मणा कश्चित् संस्कारविशेषः उद्भवति, स धर्मः, पुण्यम् वा इति कथ्यते। स च अन्तःकरणे तिष्ठति।

वेदनिषिद्धकर्मकरणे कश्चित् संस्कारविशेषः उद्भवति, सः अधर्मः, पापं वा इति कथ्यते। स च अन्तःकरणे तिष्ठति।

यदा चैत्रः धार्मिकं मैत्रं प्रति वदति यद् त्वं धार्मिकः इति। तदा चैत्रस्य वाक्याद् मैत्रस्य स्वधर्मविषयकं शाब्दं ज्ञानम् उत्पद्यते। तस्मिन् ज्ञाने विषयः धर्मः अस्ति। स च धर्मः मैत्रस्य अन्तःकरणे अस्ति। एवञ्च वाक्यश्रवणादेव धर्माकारा वृत्तिः मैत्रस्य अन्तःकरणे उदेति। अतः धर्मदेशः अन्तःकरणम्। तद्वृत्तिदेशः अपि अन्तःकरणम्। किञ्च धर्मः अन्तःकरणे वर्तते, धर्मे वर्तमानत्वम् अस्ति। अतः प्रमाणचैतन्यस्य वर्तमानविषयचैतन्येन अभेदः अत्र भवति। अत्र प्रत्यक्षज्ञानस्य प्रोक्तं प्रयोजकम् अस्ति। तेन धर्मविषयके अस्मिन् ज्ञाने प्रत्यक्षत्वापत्तिः।

यद्यपि धर्माधर्मौ अन्तःकरणे वर्तेते। तथापि तद्विषयकं प्रत्यक्षं ज्ञानं कदापि कस्यापि मर्त्यस्य नैव उत्पद्यते। धर्माधर्मौ अनुमानेन आगमेन वा ज्ञायेते, न तु प्रत्यक्षेण प्रमाणेन।

अतः अतिव्याप्तिवारणाय योग्यत्वं विषयस्य विशेषणं देयम्। अर्थात् यदि **योग्यः** विषयः वर्तमानः अस्ति, किञ्च उपाधिद्वयम् एकदेशे अस्ति, तर्हि उपधेयचैतन्ययोः अभेदः भवति चेत् ज्ञानं प्रत्यक्षम् इति। अर्थात् **प्रमाणचैतन्यस्य योग्यवर्तमानविषयचैतन्येन अभेदः** प्रत्यक्षत्वस्य प्रयोजकम्।

सुखदुःखे अन्तःकरणे वर्तेते। धर्माधर्मौ अपि अन्तःकरणे वर्तेते। तथापि सुखदुःखयोः प्रत्यक्षं ज्ञानम् उत्पद्यते। धर्माधर्मौ तु न प्रत्यक्षज्ञानविषयौ। कथम् अयं भेदः। सुखदुःखयोः प्रत्यक्षयोग्यत्वम् अस्ति, धर्माधर्मयोः नास्ति। एवं पार्थक्यस्य किं कारणम्। तत्रोच्यते - फलबलकल्प्यः स्वभावविशेषः प्रयोजकः। फलम् अत्र प्रत्यक्षं ज्ञानम्, अनुमितिज्ञानं वा। तत्र सुखस्य प्रत्यक्षं भवति। अतः सुखे प्रत्यक्षत्वस्य प्रयोजकम् अस्ति। प्रत्यक्षत्वस्य प्रयोजकं च उद्भूतत्वम्। धर्मस्य अधर्मस्य वा प्रत्यक्षं न भवति। अतः तत्र प्रत्यक्षत्वस्य प्रयोजकम् उद्भूतत्वं नास्ति। अयमेव स्वभावविशेषः यत् कस्यचिद् उद्भूतत्वम् अस्ति, कस्यचिद् नास्ति। उद्भूतत्वं च लौकिकविषयतावत्त्वम् अथवा प्रत्यक्षत्वप्रयोजकधर्मविशेषः। अर्थात् तादृशधर्मविशेषः यद्वशात् तद्धर्मिविषयकं प्रत्यक्षं ज्ञानम् उत्पद्यते इति।

ज्ञानगतस्य प्रत्यक्षत्वस्य विषये अयं निर्गलितः अर्थः - **तत्तत्प्रत्यक्ष-योग्य-वर्तमान-विषयावच्छिन्नचैतन्याभिन्नत्वं तत्तदाकारवृत्त्यवच्छिन्नज्ञानस्य तत्तदंशे प्रत्यक्षत्वम्।**

चाक्षुषप्रत्यक्षयोग्यः वर्तमानः च घटः विषयः। तदवच्छिन्नचैतन्यस्य घटाकारवृत्त्यवच्छिन्नचैतन्येन अभेदः एव तदा उत्पन्नस्य ज्ञानस्य घटांशे प्रत्यक्षत्वम् इति समन्वयः।

पाठगतप्रश्नाः -३

२२. अयं घटः इति चाक्षुषप्रत्यक्षं कथमुत्पद्यते इति वेदान्तमतेन।

२३. पर्वतो वह्निमान् धूमात् इत्यादिकम् अनुमानस्थले कस्य प्रत्यक्षत्वम्।

२४. ज्ञानज्ञानं प्रत्यक्षमनुमितिरुपमितिः शाब्दम् वा।

२५. अनुमितिः प्रत्यक्षेण ज्ञायते न वा।

२६. सुखस्मृतिः प्रत्यक्षा न वा।

२७. पुण्यस्य कारणं किम्।

२८. पापम् किम्।

२९. धर्मः प्रत्यक्षवेद्यः न वा।

३०. अधर्मः प्रत्यक्षवेद्यः न वा।

३१. ज्ञानगतस्य प्रत्यक्षत्वस्य निर्गलितं लक्षणं लिखत।

६.३.२) विषयगतस्य प्रत्यक्षत्वस्य प्रयोजकम्

इतः पूर्वं ज्ञानगतस्य प्रत्यक्षत्वस्य प्रयोजकं किमिति आलोचितम्। सविस्तरम्। इतः परं विषयगतस्य प्रत्यक्षत्वस्य प्रयोजकं किमिति विषयः उपन्यस्यते।

प्रमात्रभिन्नत्वं हि विषयस्य प्रत्यक्षत्वम्। प्रमात्रभिन्नत्वम् इत्यस्य अर्थो हि प्रमातृसत्तातिरिक्त-सत्ताकत्वाभावः। प्रमातृसत्ता हि प्रमातृचैतन्यस्य सत्ता। प्रमातुः या सत्ता, ततः अतिरिक्ता सत्ता यस्य स प्रमातृसत्तातिरिक्तसत्ताकः। तत्त्वम् प्रमातृसत्तातिरिक्तसत्ताकत्वम्। तादृशस्य प्रमातृसत्तातिरिक्तसत्ताकत्वस्य अभावः एव प्रमात्रभेदः। अयमभावः यस्मिन् विषये स विषयः प्रत्यक्षः।

विवरणम्

वेदान्तमते समग्रं जगत् ब्रह्मणि अध्यस्तम्। अविद्योपहितं घटादिविषयावच्छिन्नं यत् चैतन्यं तस्मिन् सर्वोऽपि प्रपञ्चः अध्यस्तः। तत्र अधिष्ठानं चैतन्यम्। अध्यस्तः घटादिविषयः। सर्वोऽपि अध्यस्तो विषयः मिथ्या। अतः तस्य स्वकीया चैतन्यभिन्ना कापि सत्ता नास्ति। अधिष्ठानचैतन्यम् अध्यस्तस्य सत्ता। अविद्योपहितं घटावच्छिन्नं चैतन्यं हि घटस्य अधिष्ठानम्। तच्चैतन्यसत्ता एव घटस्य सत्ता, ततः भिन्ना घटस्य कापि सत्ता नाङ्गीक्रियते।

यदा अन्तःकरणं घटाकारं भवति तदा यथा प्रमाणावच्छिन्नं चैतन्यं विषयावच्छिन्नं चैतन्यम् एकदेशस्थं भवति, तद्वत् अन्तःकरणावच्छिन्नं चैतन्यम् अर्थात् प्रमातृचैतन्यमपि विषयदेशस्थं भवति। इत्थम् विषयचैतन्यं, प्रमाणचैतन्यं, प्रमातृचैतन्यं च एकदेशस्थं भवति। तदा एतच्चैतन्यत्रयस्य ऐक्यं भवति।

इत्थं विषयस्य सत्ता हि तदधिष्ठानम्। तच्च विषयावच्छिन्नं चैतन्यम्। प्रमातृचैतन्यस्य विषयचैतन्येन ऐक्यं भवति। अत्र प्रमातृचैतन्यस्य या सत्ता सा एव सत्ता विषयावच्छिन्नचैतन्यस्य सत्ता। विषयस्य सत्ता च विषयावच्छिन्नचैतन्यमेव। अतः प्रमातृसत्तातः अतिरिक्ता सत्ता विषयस्य नास्ति। एवम् प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः हि विषये अस्ति। अतः तादृशविषयः प्रत्यक्षः भवति।

समन्वयः

घटविषयं चाक्षुषप्रत्यक्षस्थले घटावच्छिन्नचैतन्यस्य या सत्ता सा एव घटस्य सत्ता। यदा चक्षुर्घटयोः सन्निकर्षः भवति तदा अन्तःकरणं घटदेशं गच्छति, घटाकारा वृत्तिः भवति। तदा घटावच्छिन्नचैतन्यं घटाकारवृत्त्यवच्छिन्नं प्रमाणचैतन्यं, प्रमातृचैतन्यं च एकेदशस्थं भवति, किञ्च तेषाम् अभेदः भवति। तत्र घटस्य सत्ता हि घटावच्छिन्नचैतन्यस्य सत्ता, घटावच्छिन्नचैतन्यं प्रमातृचैतन्यं च एकमेव। अतः प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः एव घटस्य अस्ति इति घटः प्रत्यक्षः विषयः। प्रत्यक्षः विषयः एव अपरोक्षः विषयः अपि कथ्यते।

यदा पर्वतो वह्निमान् इत्यादिः अनुमितिः उत्पद्यते तदा इन्द्रियस्य पर्वतेन सन्निकर्षः भवति, वह्निना सह नैव भवति। अतः अन्तःकरणं पर्वतदेशं गच्छति, वह्निदेशं तु न गच्छति। पर्वताकारा वृत्तिः उदेति, वह्न्याकारा तु नोदेति। अतः प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः पर्वते अस्ति, वह्नौ नास्ति। अतः एव पर्वतः प्रत्यक्षविषयः, वह्निः न प्रत्यक्षविषयः।

धर्मादीनां प्रत्यक्षविषयत्ववारणम्

चैत्रः धर्मवान् सुखात् इत्याद्यनुमानस्थले धर्मः अनुमानेन ज्ञातः। तदा धर्मस्य सत्ता धर्मावच्छिन्नं चैतन्यमेव। अन्तःकरणस्य क्वापि गमनस्यावश्यकता नास्ति यतो हि धर्मः अन्तःकरणे एव वर्तते। अतः प्रमातृचैतन्यस्य सत्ता एव धर्मावच्छिन्नचैतन्यस्य सत्ता। अतः एव प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः धर्मे लभ्यते। तेन धर्मस्य प्रत्यक्षत्वापत्तिः। धर्मः कदापि न प्रत्यक्षः। अतः तद्वारणाय योग्यत्वं विषयस्य विशेषणं देयम्। अर्थात् **प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः यदि प्रत्यक्षयोग्ये विषये स्यात् तर्हि स विषयः प्रत्यक्षः बोध्यः**। एवञ्च धर्मः न प्रत्यक्षयोग्यः। अतः प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः धर्मे अस्ति, तथापि प्रत्यक्षयोग्यत्वं धर्मे नास्तीति नातिव्याप्तिः।

अतीतसुखस्य अनुमितिः भवति चेत् सुखाकारा वृत्तिः उत्पद्यते। सुखम् अन्तःकरणे, वृत्तिः च अन्तःकरणे भवतः। तदा प्रमातृचैतन्यस्य विषयचैतन्यस्य च अभेदः भवति। तदा द्वयोः सत्ता न भिन्ना। एवं प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः किञ्च प्रत्यक्षयोग्यत्वं विषये सुखे वर्तते इति अतिव्याप्तिः। तद्वारणाय वर्तमानत्वं विषयस्य विशेषणं देयम्। **प्रत्यक्षत्व-वर्तमानत्वसमानाधिकणः प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः विषयगतप्रत्यक्षत्वस्य प्रयोजकः।** अतीतसुखे वर्तमानत्वाभावात् नातिव्याप्तिः।

नीलो घटः इति प्रत्यक्षस्थले घटगतनीलत्वस्य प्रत्यक्षत्वं भवति। यतो हि रूपे प्रत्यक्षयोग्यत्वं वर्तमानत्वं प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः च वर्तन्ते। यस्मिन् घटे नीलत्वं वर्तते तस्मिन्नेव घटे घटस्य परिमाणादिकं वर्तते। नीलत्वावच्छिन्नचैतन्यस्य उपाधिः नीलत्वम्। परिमाणावच्छिन्नचैतन्यस्य उपाधिः

परिमाणम्। नीलत्वं परिमाणं च घटे अर्थात् एकदेशे वर्तेते। अतः नीलत्वावच्छिन्नचैन्यस्य परिमाणावच्छिन्नचैतन्येन अभेदः अस्ति। नीलत्वावच्छिन्नचैतन्यस्य प्रमातृचैतन्येन अभेदः भवति। नीलत्वस्य सत्ता तु नीलत्वावच्छिन्नचैतन्यस्य सत्ता एव। किञ्च परिमाणस्य सत्ता परिमाणावच्छिन्नचैतन्यस्य सत्ता एव। इत्थं परिमाणे वर्तमानत्वं प्रत्यक्षयोग्यत्वं प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः च वर्तन्ते। अतः परिमाणस्य प्रत्यक्षत्वापत्तिः। किन्तु यदा रूपस्य प्रत्यक्षं भवति तदा परिमाणस्य प्रत्यक्षत्वं नाङ्गीक्रियते।

अतिव्याप्तिवारणाय तत्तदाकारवृत्त्युपहितत्वं प्रमातृचैतन्यस्य विशेषणं निवेशनीयम्। इत्थं **प्रत्यक्षयोग्यत्वं वर्तमानत्वं तत्तदाकारवृत्त्युपहित-प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः च यस्मिन् विषये स विषयः प्रत्यक्षः** इति बोध्यम्। अर्थात् यस्मिन् विषये प्रत्यक्षयोग्यत्वं वर्तमानत्वं चास्ति, एवञ्च तदाकारा एव या वृत्तिः, तदुपहितं यत् प्रमातृचैतन्यं तत्सत्तातिरिक्तसत्ताकत्वाभावः अपि तस्मिन्नेव विषये यदि स्यात् तर्हि स विषयः प्रत्यक्षः इति।

यदा नीलो घट इति चाक्षुषप्रत्यक्षं जायते तदा चक्षुषः नीलत्वेन सह संयुक्ततादात्म्यसम्बन्धः उत्पद्यते। तदा नीलत्वस्य चक्षुषः तयोः सम्बन्धस्य च स्वभाववशात् नीलत्वाकारा वृत्तिः उत्पद्यते, गन्धाद्याकारा वृत्तिः नोत्पद्यते। यदा नीलो घट इति ज्ञानं भवति, तदा नीलो महान् एको घट इत्यपि ज्ञानं सम्भवति। एकस्मिन्नेव ज्ञाने नीलत्वम् महत्त्वम् एकत्वं च भासन्ते। अतः परिमाणाकारा वृत्तिः सम्भवति। परन्तु प्रमाता यदि केवलं नीलो घट इति एव अभिलपितुम् इच्छति तदा परिमाणं विषयः न भवति। यदा परिमाणं विषयः नास्ति तदा एव अयं प्रश्नः उदेति। तत्र नीलत्वाकारया वृत्त्या प्रमातृचैतन्यमपि उपहितं भवति। अतः नीलत्वे प्रत्यक्षयोग्यत्वं वर्तमानत्वं नीलत्वाकारवृत्त्युपहित-प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः अस्ति। अतः नीलत्वं प्रत्यक्षः विषयः। परिमाणाकारा वृत्तिः नास्ति। अतः परिमाणाकारया वृत्त्या उपहितं चैतन्यमपि नास्ति। अतः यद्यपि परिमाणे प्रत्यक्षयोग्यत्वं वर्तमानत्वं चास्ति तथापि परिमाणाकारवृत्त्युपहित-प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः नास्तीति न परिमाणं प्रत्यक्षः विषयः।

न्यायमते अयं घटः इति प्रथमज्ञानं व्यवसायः कथ्यते। व्यवसायविषयकं प्रत्यक्षं ज्ञानम् अनुव्यवसायः कथ्यते। परन्तु वेदान्तिनः व्यवसायस्य ज्ञानम् अनुव्यवसायेन इति नाङ्गीकुर्वन्ति। अतः प्रथमज्ञाने एव प्रमातृ-प्रमिति-प्रमेयाणि इति त्रीणि भासन्ते। अर्थात् यदा घटः ज्ञाने भासते तदा तदाकारा वृत्तिरपि तस्मिन्नेव ज्ञाने भासते।

यदा घटविषयकं प्रत्यक्षं ज्ञानम् उत्पद्यते तदा घटाकारवृत्तिविषयकमपि प्रत्यक्षम् उत्पद्यते। परन्तु यथा घटज्ञानाय घटाकारवृत्तिः, तथा वृत्तिज्ञानाय वृत्त्याकारा अपरा द्वितीया वृत्तिः, द्वितीयवृत्तिज्ञानाय तृतीया वृत्तिः इति एवम् न भवति। अर्थात् द्वितीयतृतीयादिवृत्तयः न उद्भवन्ति। किन्तु घटाकारवृत्तिः स्वम् अपि विषयीकरोति। घटाकारवृत्तिः स्वयम् अधुना स्वस्य विषयः। अतः वृत्त्युपहित-प्रमातृसत्तातिरिक्ता तस्याः सत्ता नास्ति। अर्थात् तस्याम् वृत्त्युपहित-प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः अस्ति। एवञ्च तस्याम् वर्तमानत्वं, प्रत्यक्षयोग्यत्वं च अस्ति। अतः वृत्तिः प्रत्यक्षः विषयः।

१) अन्तःकरणम्, २) तद्धर्माः सुखादयः, ३) वृत्तिः, ४) प्रातिभासिकरजतादिकम् ५) साक्षी च इति एतद्विषयकम् अपि प्रत्यक्षं ज्ञानम् उत्पद्यते। परन्तु यथा घटादिप्रत्यक्षस्थले इन्द्रियार्थसन्निकर्षेण

अन्तःकरणं विषयदेशं गच्छति एवञ्च विषयाकारा प्रमाणवृत्तिः उदेति। तथा एतेषां विषये न भवति। एतेषां केनापि इन्द्रियेण सन्निकर्षः न भवति। अतः तत्तदाकारा प्रमाणवृत्तिः नैव भवति।

विषयः अज्ञानेन आवृतः भवति। यो विषयः अज्ञानावृतः भवति तद्विषये एव संशयविपर्ययादिकम् उत्पद्यते। विषयज्ञानाय अस्य अज्ञानस्य आवरणस्य भङ्गः आवश्यकः, एवञ्च साक्षिचैतन्येन सह सम्बन्धः आवश्यकः। एवम् आवरणभङ्गः साक्षिचैतन्यसम्बन्धः इति एतद्द्वयम् कथम् सम्भवति। यदा इन्द्रियार्थसन्निकर्षः भवति तदा अन्तःकरणम् इन्द्रियद्वारा विषयदेशं गच्छति, विषयाकारा प्रमाणवृत्तिश्च उदेति। तदा चैतन्ययोः अभेदः भवति, तेन आवरणभङ्गः भवति। अपि च प्रमाणवृत्तिद्वारा साक्षिचैतन्यस्य विषयेण सह सम्बन्धः अपि भवति। एवम् आवरणभङ्गः साक्षिसम्बन्धः च सम्पद्येते।

यो विषयः अज्ञानेन आवृतः नास्ति, अथवा यो विषयः साक्षात् साक्षिचैतन्येन सम्बद्धः अस्ति, तयोः प्रकाशनाय कापि प्रमाणवृत्तिः नापेक्षिता। ते च विषयाः १) अन्तःकरणम्, २) तद्धर्माः सुखादयः, ३) वृत्तिः, ४) प्रातिभासिकरजतादिकम् इति एते। एतेषां विषये कस्यापि संशयविपर्ययादिकं न भवति। अतः एते अज्ञानेन आवृताः न सन्ति। किञ्च एतेषां साक्षिचैतन्ये आश्रिताः, अतः साक्षिणा सह तेषां साक्षात् सम्बन्धोऽपि अस्ति। एतेषां ज्ञानाय यावद् साक्षिचैतन्यं विषयाकारं न भवति तावत् प्रत्यक्षं न उदेति। साक्षिचैतन्यं निराकारमस्ति। तस्य सुखाद्याकारात्वं स्वतः नैव सम्भवति। अतः चैतन्यस्य विषयाकारत्वाय अविद्यावृत्तिः उत्पद्यते। प्रमाणवृत्तितः अविद्यावृत्तिः भिन्ना इति अवधेयम्। किञ्च अविद्यावृत्तिः न अन्तःकरणवृत्तिः इत्यपि बोध्यम्।

प्रत्यक्षयोग्यत्वं वर्तमानत्वं तत्तदाकारवृत्त्युपहित-प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः च यस्मिन् विषये स विषयः प्रत्यक्षः इति प्रोक्तमेव। सुखादयः वर्तमानाः प्रत्यक्षयोग्याः सन्ति। किञ्च तत्तदाकारा अविद्यावृत्तिरपि उदेति। अतः तत्तदाकारवृत्त्युपहित-प्रमातृसत्तातः अतिरिक्ता तेषां सत्ता नास्ति। एवं लक्षणसमन्वयः भवति। यद्यपि सुखादीनां कृते इन्द्रियद्वारा बहिः अन्तःकरणस्य बहिः गमनाभावात् प्रमाणवृत्तिः न उदेति तथापि अविद्यावृत्तिः उदेति।

केचिद् विषयाः साक्षिवेद्याः। केचिच्च केवलसाक्षिवेद्याः। येषाम् इन्द्रियेण सन्निकर्षवशाद् तत्तदाकारा वृत्तिः भवति, सा प्रमाणवृत्तिः। येषां प्रकाशनाय प्रमाणवृत्तिः अपेक्षिता अथवा अनुमानादिप्रमाणव्यापारः अपेक्षितः, ते साक्षिवेद्याः कथ्यन्ते। येषां प्रकाशनाय प्रमाणवृत्तिः न अपेक्षिता, अनुमानादिप्रमाणव्यापारः नापेक्षितः, केवलम् अविद्यावृत्तिः अपेक्षिता ते केवलसाक्षिवेद्याः कथ्यन्ते।

तत्रायं निर्गलितः अर्थः - **स्वाकारवृत्त्युपहित-प्रमातृ-चैतन्य-सत्तातिरिक्त-सत्ताकत्वशून्यत्वे सति योग्यत्वे सति वर्तमानत्वं विषयगतं प्रत्यक्षत्वम्** इति। स्वम् अत्र विषयः।

एतावता ज्ञानगतस्य प्रत्यक्षत्वस्य प्रयोजकं किम्, विषयगतस्य च प्रत्यक्षत्वस्य प्रयोजकम् किमिति अति विस्तरेण उपन्यस्तम्।

पाठगतप्रश्नाः -४

३२. जगत् क्वाध्यस्तम्।

३३. वेदान्तमते अनुव्यवसायः अङ्गीकृतो न वा।

३४. सुखम् अज्ञानावृतमस्ति न वा।

३५. सुखविषये कस्यापि भ्रमो जायते वा।

३६. के साक्षिवेद्याः।

३७. के केवलसाक्षिवेद्याः।

३८. विषयगतप्रत्यक्षत्वस्य प्रयोजकस्य निष्कृष्टं लक्षणं किम्।

पाठसारः

प्रमायाः षड् भेदाः - प्रत्यक्षप्रमा अनुमितिः उपमितिः शाब्दी अर्थापत्तिः अनुपलब्धिः चेति। एतासु प्रत्यक्षप्रमा का इति अस्मिन् पाठे विस्तरेण उपपादितम्। सावयवम् अन्तःकरणम् चक्षुरादीन्द्रियैः बहिः गत्वा विषयाकारम् भवति। अयं घटादिविषयाकारेण अन्तःकरणस्य परिणामः एव वृत्तिरिति कथ्यते। तेन घटादिद्रव्यं ज्ञायते। द्रव्यवृत्तिगुणानां द्रव्यात् न अत्यन्तं भेदः। अतः यथा द्रव्याकारा वृत्तिः तथैव गुणाद्याकारा वृत्तिरपि भवति। अन्तःकरणस्य अवस्थाविशेषः यत्र अस्तित्वादिव्यवहारस्य प्रतिबन्धकम् अज्ञानम् निवर्तते सा अवस्था एव वृत्तिरिति कथ्यते। घटादिविषयाकारा वृत्तिः भवति तदा घटादिविषयचैतन्यं अभिव्यक्तं भवति। इदम् अभिव्यक्तं चैतन्यमेव प्रत्यक्षप्रमा न तु उपाधिरहितं शुद्धं चैतन्यम्।

यया वृत्त्या विषयचैतन्यम् अभिव्यक्तं भवति सा वृत्तिः इन्द्रियस्य विषयेण यत्सम्बन्धवशात् उत्पद्यते स सम्बन्धः सन्निकर्षः कथ्यते। इन्द्रियं च सन्निकर्षात्मकव्यापारवत् प्रमां प्रति असाधारणं कारणम् अस्ति इत्यतः इन्द्रियं प्रत्यक्षप्रमायाः करणम् इति सिद्ध्यति।

वृत्त्यभिव्यक्तं चैतन्यम् प्रत्यक्षप्रमा। यद्यपि चैतन्यं नोत्पद्यते तथापि तदवच्छेदवृत्तिः उत्पद्यते। अतः तदवच्छिन्नं चैतन्यमपि जन्यम् उच्यते। यद्यपि ज्ञानं चैतन्यमेव तथापि अध्यासवशात् वृत्तिरेव ज्ञानम् इति व्यवहारः।

ज्ञानम् सुखं दुःखम् इच्छा द्वेषः धर्मः अधर्मः इत्यादयः अन्तःकरणधर्माः। यद्यपि एवं तथापि अहं सुखी इत्यादौ सुखम् आत्मधर्मः इति प्रतीयते। तत्रोच्यते - आत्मना अन्तःकरणस्य ऐक्याध्यासः भवति। तदा आत्मनि ज्ञानसुखादीनाम् अन्तःकरणधर्माणाम् आरोपः, अध्यासः भवति। अध्यासवशादेव

अनुभवः 'अहं सुखी' इत्यादिः उपपद्यते। एवञ्च मनः न इन्द्रियम्। अन्तःकरणोपहितं चैतन्यं साक्षी इति कथ्यते। साक्षी सदा प्रकाशस्वभावः।

किमपि ज्ञानम् प्रत्यक्षम् इत्यत्र प्रत्यक्षत्वस्य प्रयोजकं किम्। कोऽपि विषयः प्रत्यक्षः इत्यत्र प्रत्यक्षत्वस्य प्रयोजकम् किम्। एवं ज्ञानगतप्रत्यक्षत्वस्य विषयगतप्रत्यक्षत्वस्य प्रयोजकं किमिति विषयद्वयं सविस्तरमालोचितम् अस्मिन् पाठे। तत्र प्रमाणचैतन्यस्य योग्यवर्तमानविषयचैतन्येन अभेदः प्रत्यक्षत्वस्य प्रयोजकमिति सिद्धान्तितम्। स्वाकारवृत्त्युपहित-प्रमातृ-चैतन्य-सत्तातिरिक्त-सत्ताकत्वशून्यत्वे सति योग्यत्वे सति वर्तमानत्वं विषयगतं प्रत्यक्षत्वमिति सिद्धान्तितम्।

पाठान्तप्रश्नाः

१. अन्तःकरणस्य सावयवत्वम् प्रतिपदायत।

२. वृत्तिः कथम् उत्पद्यते इति लिखत।

३. गुणक्रियाद्याकारा वृत्तिः कथम्।

४. प्रत्यक्षप्रमां विस्तारयत।

५. इन्द्रियस्य करणत्वम् उपपादयत।

६. वृत्तौ ज्ञानत्वोपचारः कथम्।

७. अनादि चैतन्यं कथं प्रमा।

८. ज्ञानदयः मनोधर्माः इति उपपादयत।

९. प्रत्यक्षज्ञानविषयत्वं प्रत्यक्षत्वस्य प्रयोजकम् इत्यत्र को दोषः।

१०. साक्षिलक्षणं सदलकृत्यम् उपस्थापयत।

११. प्रमाणचैतन्यादित्रिविधं चैत्यन्यम् वर्णयत।

१२. चैतन्यं तु एकमेव। कथं तर्हि तस्य त्रैविध्यम्।

१३. ज्ञानगतस्य प्रत्यक्षत्वस्य प्रयोजकस्य लक्षणं सदलकृत्यमुपस्थापयत।

१४. पर्वतो वह्निमान् धूमात् इत्यादिकम् अनुमानस्थले कस्य प्रत्यक्षत्वम् कुतः च।

१५. सुखादिविषयकं प्रत्यक्षं कथमुत्पद्यते।

१६. प्रमाणचैतन्यस्य वर्तमानविषयचैतन्येन अभेदः प्रत्यक्षत्वस्य प्रयोजकम् इति प्रयोजकलक्षणे वर्तमानत्वं यदि न विषयविशेषणं तर्हि का आपत्तिः।

१७. प्रमाणचैतन्यस्य योग्यवर्तमानविषयचैतन्येन अभेदः प्रत्यक्षत्वस्य प्रयोजकम् इति प्रयोजकलक्षणे योग्यत्वं यदि न विषयविशेषणं तर्हि का आपत्तिः।

१८. घटावच्छिन्नचैतन्यसत्ता एव घटस्य सत्ता इति कथम्।

१९. पर्वतो वह्निमान् इत्यादिः अनुमानस्थले पर्वतस्य कथं न प्रत्यक्षविषयत्वम्।

२०. सुखादीनां साक्षिवेद्यानां प्रत्यक्षं कथमुत्पद्यते।

पाठगतप्रश्नानाम् उत्तराणि

१. प्रमा षोढा - प्रत्यक्षप्रमा अनुमितिः उपमितिः शाब्दी अर्थापत्तिः अनुपलब्धिः चेति।

२. प्रत्यक्षम्।

३. प्रत्यक्षशब्दस्य प्रयोगः त्रिषु अर्थेषु क्रियते। प्रत्यक्षम् प्रमाणम्। प्रत्यक्षम् ज्ञानम्। प्रत्यक्षः विषयः इति।

४. सावयवम्।

५. अनित्यः।

६. तन्मनोऽसृजत इति।

७. प्रत्यक्षप्रमा चैतन्यम्।

८. यया वृत्त्या विषयचैतन्यम् अभिव्यक्तं भवति सा वृत्तिः इन्द्रियस्य विषयेण यत्सम्बन्धवशात् उत्पद्यते स सम्बन्धः सन्निकर्षः कथ्यते।

९. तज्जन्यत्वे सति तज्जन्यजनकत्वं व्यापारलक्षणम्।

१०. सन्निकर्षः।

११. व्यापारवद् असाधारणं कारणम् करणम्।

१२. अन्तःकरणस्य।

१३. अन्तःकरणस्य।

१४. श्रोत्रं त्वक् चक्षुः जिह्वा (रसना) घ्राणम् एतानि पञ्च ज्ञानेद्रियाणि।

१५. न।

१६. मनसः अनिन्द्रियत्वे प्रमाणं श्रुतिः - इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः इति।

१७. न।

१८. तत्तेदन्तावगाहि ज्ञानं हि प्रत्यभिज्ञा।

१९. अन्तःकरणोपहितं चैतन्यं साक्षी इति कथ्यते।

२०. अन्तःकरणस्य विषयाकारः परिणामविशेषः या वृत्तिः तया वृत्त्या अवच्छिन्नं चैतन्यम् हि प्रमाणचैतन्यम्।

२१. अन्तःकरणस्य यावान् अंशः विषयाकारः परिणामः नास्ति, तेन अन्तःकरणांशेन अवच्छिन्नं चैतन्यम् अन्तःकरणावच्छिन्नचैतन्यं, प्रमातृचैतन्यं, प्रमाता इति शब्दैः व्यपदिश्यते।

२२. अयं घटः इति चाक्षुषप्रत्यक्षस्थले घटः बाह्यः, अन्यदेशस्थः च। चक्षुषः घटेन सह संयोगवशात् अन्तःकरणम् चक्षुद्वारेण बहिः गच्छति, घटदेशस्थं भवति। एवञ्च तस्य घटाकारेण परिणामः

भवति। तदा घटाकारा वृत्तिः भवति। इयं वृत्तिरेव प्रमाणम्। तदवच्छिन्नं चैतन्यम् प्रमाणचैतन्यम्। यदा घटाकारा वृत्तिः भवति तदा घटावच्छिन्नचैतन्यस्य प्रमाणचैतन्येन अभेदः भवति। तदा 'अयं घटः' घटविषयकं चाक्षुषप्रत्यक्षम् ज्ञानम् उत्पद्यते।

२३. पर्वतस्य।

२४. प्रत्यक्षम्।

२५. ज्ञायते।

२६. न।

२७. वेदतन्मूलकशास्त्रविहितकर्मजन्यः अन्तःकरणस्य संस्कारविशेषः पुण्यम्।

२८. वेदतन्मूलकशास्त्रनिषिद्धकर्मानुष्ठानजन्यः अन्तःकरणस्य संस्कारविशेषः पापम्।

२९. न।

३०. न।

३१. तत्तत्प्रत्यक्ष-योग्य-वर्तमान-विषयावच्छिन्नचैतन्याभिन्नत्वं तत्तदाकारवृत्त्यवच्छिन्नज्ञानस्य तत्तदंशे प्रत्यक्षत्वम्।

३२. जगदवच्छिन्नचैतन्ये।

३३. न।

३४. न।

३५. न।

३६. येषां प्रकाशनाय प्रमाणवृत्तिः अपेक्षिता अथवा अनुमानादिप्रमाणव्यापारः अपेक्षितः, ते विषयाः साक्षिवेद्याः कथ्यन्ते।

३७. येषां प्रकाशनाय प्रमाणवृत्तिः न अपेक्षिता, अनुमानादिप्रमाणव्यापारः नापेक्षितः, केवलम् अविद्यावृत्तिः अपेक्षिता ते विषयाः केवलसाक्षिवेद्याः कथ्यन्ते।

३८. स्वाकारवृत्त्युपहित-प्रमातृ-चैतन्य-सत्तातिरिक्त-सत्ताकत्वशून्यत्वे सति योग्यत्वे सति वर्तमानत्वं विषयगतं प्रत्यक्षत्वम्।

॥ इति षष्ठः पाठः ॥